# 2023

## M.A.

## 4th Semester Examination

## SANSKRIT

## PAPER : SAN-405A & 405B

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

Answer from *any* **one** Group.

### GROUP—A

### ( LITERATURE )

Answer **all** questions.

**( सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )**

1. यथेच्छं **प्रश्नद्वयं** समाधेयम् : $2 \times 2 = 4$

(क) अमरमङ्गलम् इति कस्य कृतिः ? ग्रन्थस्यास्य टीकायाः तत्कर्तुश्च नाम किम् ?

(ख) कम्बोजवेशधारी कः आसीत्? तस्यापरं वैशिष्टयम् एकं लिख्यताम्।

(ग) वीरा का?

**2.** सप्रसङ्गं **द्वयोर्व्याख्या** कार्या : 4×2=8

(क) मृताप्यमृतनिष्पन्दा निष्पदापि चतुष्पदा।
अवर्णा बहुवर्णापि माता गौरस्तु वः श्रिये।।

(ख) अवधीरणशङ्कयास्यमस्याः
क्षणमारक्तमथापि धूसरश्रि।
जलदान्तरितातपैः प्रभाते
परिमृष्टोज्झितपुण्डरीकतुल्यम्।।

(ग) तापं कृशानौ सलिलं समुद्रे
शैत्यं तुषारे सुषमां शशाङ्के।
वृक्षानरण्ये चलनञ्च वायौ
वदाम्यशेषं गणना प्रभावात्।।

**3.** **एकः** समाधेयः : 8×1=8

(क) का नाम प्रस्तावना? अमरमङ्गलनाटकस्य प्रस्तावना प्रस्तावनाभेदेषु कीदृशी? सा यथार्था न वेति विचार्यताम्।

(ख) समरसिंहः कः? स केन प्रकारेण अमरसिंहं युद्धे प्रोत्साहितवान्?

4. **प्रश्नद्वयं** समाधेयम् : 2×2=4

(क) 'रुक्मिणीहरणम्' इति महाकाव्ये कति सर्गाः सन्ति? अस्य महाकाव्यस्य प्रथमसर्गः केन छन्दसा रचितः?

(ख) 'विलोक्य तां रिपुवनिताः वितत्रसुः' – किं विलोक्य रिपुवनिताः वितत्रसुः?

(ग) कः किमर्थं मधुरिपुं जहास?

5. **द्वयोर्व्याख्या** कार्या : 4×2=8

(क) विकर्तनो महसि मुखे शशी कृतौस मङ्गलो मनसि
बुधो गुरुर्गुणे।
कविर्गिरि द्विषति शनिश्च तस्थिवान्
तथाप्यभून्नृपतिरसौ सुदुर्ग्रहः।।

(ख) तमःक्रमो निशि चलता लताततौ
दिवोष्णता शशिनि कलङ्ककालिमा।
कलिर्युगे वचसि विभक्तियोजनं
तदाभवद्वपुषि च शक्तिधारणम्।।

(ग) कलावतः सकलजनप्रमोदिनः सितात्मनोऽप्यमृतकरस्य यस्य च।
कलङ्किनीं किल परिचायिनीं तनोर्विधोर्विधां ननु विदधी पटुर्विधिः।।

6. एकः प्रश्नः समाधेयः : 8×1=8

(क) रुक्मिणीहरणमिति महाकाव्यस्य प्रथमसर्गे वर्णितस्य राज्ञः भीष्मकस्य चारित्रिकं वैशिष्ट्यमालोच्यताम्।

(ख) महाकविहरिदास सिद्धान्तवागीशविषये नातिदीर्घो निबन्धो विरच्यताम्।

## GROUP—B

## ( PHILOSOPHY )

Answer **all** questions.

**( सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )**

1. यथेच्छं प्रश्नद्वयं समाधेयम् : 2×2=4

(क) 'वाक्यपदीयम्' इति शब्दस्य व्युत्पत्तिः प्रदर्शनीया।

(ख) 'अध्याहितकलां यस्य' इत्यत्र अध्याहितकला शब्दस्य कोऽर्थः ?

(ग) 'तस्यार्थवादरूपाणि' – अत्र अर्थवादशब्देन किं बोध्यते ?

2. कारिकाद्वयं व्याख्येयम् : 4×2=8

(क) एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते।।

(ख) आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।

(ग) वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम्।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते।।

**3.** **एकः** प्रश्नः समाधेय : 8×1=8

(क) व्याकरणमते किं नाम नित्यम्? शब्दार्थसम्बन्धानां नित्यत्वं वाक्यपदीयदिशा निरूप्यताम्।

(ख) व्याकरणस्य प्रतिपाद्यविषयाः भर्तृहरि – मतानुसारमालोच्यन्ताम्।

**4.** **प्रश्नद्वयं** समाधेयम् : 2×2=4

(क) 'शिवं नत्वा हि नागेशेन' इत्यत्र शिव-शब्देन कस्य व्यपदेशः?

(ख) 'चैत्रो भवति' इत्यत्र वैयाकरणमते कीदृशः शाब्दबोधः?

(ग) के विभक्त्यर्थाः?

**5.** सप्रसङ्गं व्याख्यायताम् (पंक्तिद्वयम्) : 4×2=8

(क) धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते।

(ख) क्रियानिमित्तत्वं कारकत्वमिति स्वीकार्यमिति चेन्न।

(ग) प्रथमायाः प्रातिपदिकार्थ एवार्थः।

**6.** **एकः** समाधेय : 8×1=8

(क) परमलघुमञ्जूषानुसारं कारक स्वरूपमालोच्यताम्।

(ख) कर्मत्वविषयकं नैयायिकमतमुपपाद्य नागेशदिशा निराकुरुत।

★ ★ ★